# प्रतिदर्श–प्रश्नपत्रम्– 2024

## कक्षा १०

## संस्कृतम् (028)

पूर्णांक : 80

अवधि : होरात्रयम्

निर्देश :

1) अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।
2) उत्तराणि पृथक् प्रदत्तायाम् उत्तरपुस्तिकायां लेखनीयानि।
3) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि क्रमेण एकस्मिन् स्थाने एव लेखनीयानि।
4) प्रश्नपत्रे उत्तराणि न लेखनीयानि।
5) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।
6) खण्डसंख्या अपि लेखनीया।

### खण्ड – 'क' (अपठितांश–अवबोधनम्)

1. अधोलिखितान अनुच्छेदान् पठित्वा प्रश्नानाम् उत्तराणि लिखत–

पर्यटनं रोमाञ्चकारी भवति। प्रियजनैः सह कृतं पर्यटनम् आनन्दं ददाति। पर्यटनेन ज्ञानवृद्धिः मनोरञ्जनं च भवतः अन्यच्च यत् स्वयं दृश्यते अनुभूयते च तत् ज्ञानं स्थिरतरं भवति। कस्मिन् देशे प्रदेशे वा किं किं दर्शनीयम्? अथवा तत्र किं भुज्यते? किं पीयते? कथं व्यवहारः क्रियते? का तत्रत्या वेशभूषा? के च उत्सवाः? एतत् सर्व पर्यटनेन ज्ञायते। पर्यटन–उद्योगेन भारतशासनं पर्याप्तं धनं लभते। अतः इमम् उद्योगं वर्धयितुं शासनं यत्नशीलम् अस्ति।

(क) एकपदेन उत्तरत– 1×2=2

i. कैः सह कृतं पर्यटनम् आनन्दं ददाति?

ii. भारतशासनं केन पर्याप्तं धनं लभते?

(ख) पूर्णवाक्येन उत्तरपुस्तिकायाम् उत्तर लिखत– 1

i. कं वर्धयितुं शासनं यत्नशीलम् अस्ति?

(ग) 'निर्देशानुसारम् उत्तरम् उत्तरपुस्तिकायां लिखत– 1×2=2

i. ज्ञानम्' अस्य विशेषणपदं लिखत।

ii. 'सर्व पर्यटनेन ज्ञायते' अत्र क्रियापदं किम्?

2. अधोलिखितम् अनुच्छेदं पठित्वा अनुच्छेदाधारितान् प्रश्नान् उत्तरत–

पिपासया पीड़ितः एकः काकः इतस्ततः भ्रमति स्म। अन्ते सः एकस्मिन् स्थाने घटम् अपश्यत्। घटम् दृष्ट्वा सः प्रसन्नः भूत्वा तस्य समीपे गतवान्, परं घटस्थितं जलम् अतिन्यूनम् आसीत् अतः स जलं पातुं समर्थः न अभवत्। यत्र ध्येयः निश्चितः तत्र काऽपि बाधा न भवति इति मत्वा सः कमपि उपायम् अचिन्तयत्। घटस्य समीपे स्थितानि पाषाणखण्डानि उत्थापयित्वा सः घटे अक्षिपत्। तस्य



Downloaded from cclchapter.com

प्रयत्नेन घटस्य जलम् उपरि आगच्छत्। सः शीतलं जलं पीत्वा सुखम् अन्वभवत् प्रसन्नः भूत्वा उदपतत् च।

(क) एक पदेन उत्तरत– 1×2=2

(i) कया पीड़ितः काकः इतस्ततः अभ्रमत्?

(ii) सः किं पातुं समर्थः न अभवत्?

(ख) पूर्णवाक्येन उत्तरत– 1×2=2

(i) काकः केन कारणेन घटस्य जलं पातुं समर्थः न अभवत्?

(ii) किं मत्वाः सः उपायम् अचिन्तयत्?

(ग) यथानिर्देशम् उत्तरत– 1×2=2

(i) 'अन्वभवत्' इति पदे कः उपसर्गः अस्ति?

(ii) 'पातुम्' इत्यत्र कः प्रत्ययः?

(घ) अस्य गद्यांशस्य उपयुक्तं शीर्षकं लिखत। 1

## खण्ड – 'ख' (रचनात्मकं लेखनम्)

3. स्वविद्यालयस्य वार्षिकोत्सवं वर्णयन्तं मित्रं प्रति लिखिते अस्मिन् पत्रे उचितपदैः रिक्तस्थानानि पूरयित्वा उत्तरपुस्तिकायां लिखत– 1/2×8=4

(मञ्जूषा––वार्षिकोत्सवम्, अध्यक्षः, नमस्ते, छात्राः, कार्यक्रमियम्, राकेशः, पारितोषिकान्, पत्रम्)

परीक्षाभवनम्

तिथिः १५.०३.२००.....

प्रिय (i).....................

(ii).........................

भवतः (iii) ............... प्राप्तम्। अहं स्वविद्यालयस्य (iv)................वर्णयामि। एकमासपूर्वमेव सर्वे अध्यापकाः (v) ....................च कार्येषु व्यस्ताः आसन्। शिक्षानिदेशकः कार्यक्रमस्य (vi)............आसीत। सः कार्यक्रमम् अतीव प्राशंसत्। सः योग्येभ्यः छात्रेभ्यः च (vii)................अयच्छत्।

पितृभ्याम् नमः।

भवतः (viii)...........

क, ख, ग

4. मञ्जूषातः शब्दचयनं कृत्वा निम्नांकित–संवादं पूरयित्वा लिखत – 1×4=4

1. योगेशः– ...............नाम किम्?
2. भावनाः– मम..........भावना।
3. योगेशः– भावनाः त्वं किं ..........?
4. भावनाः– योगेशः ...........पठामि।

**मञ्जूषा** – नाम, करोषि, अहं, तव



Downloaded from cclchapter.com

5. 'मम विद्यालयः' इति विषयम् अधिकृत्य निम्नांकितशब्दसूचीतः शब्दान् चित्वा चत्वारि वाक्यानि लिखतः

**मञ्जूषा** – सर्वोत्तमः, प्रधानाचार्यः, क्रीडांगडम्, छात्राः, शिक्षकाः 2×4=8

## खण्ड– 'ग' (अनुप्रयुक्त–व्याकरणम्)

6. अधोलिखितेषु रेखांकितपदेषु सन्धिं/सन्धिविच्छेदं कृत्वा उत्तरपुस्तिकायां लिखत– 1×3=3

(क) विशालौ पर्वताविव।

(ख) पापिनाञ्च सदा दुःखम्।

(ग) रामश्च लक्ष्मणश्च वनम् अगच्छताम्।

7. रेखांकित पदेषु समासं/समासविग्रहं कृत्वा लिखत– 1×3= 3

(क) नीलकमलं विना सरः न शोभते ।

(ख) गुरुकुले छात्राः अष्टाध्यायीं स्मरन्ति ।

(ग) जनाः देशस्य भक्तान् पूजयन्ति ।

8. रेखांकितपदेषु प्रकृति–प्रत्ययौ संयोज्य वाक्यानि उत्तरपुस्तिकायां लिखत– 1×3= 3

(क) त्वया सत्साहित्यम् अवश्यमेव पठ् + तव्यत्।

(ख) गम् + शतृ छात्रः पुस्तकं पठति।

(ग) धर्म + ठक् जनः सन्मार्गम् अनुसरति।

9. मञ्जूषायाः सहायतया निम्नलिखित वाक्यानि अव्ययशब्दैः पूरयित्वा लिखत– 1×3=3

(क) वसन्तकाले पवनः ............ वहति ।

(ख) अस्माकं विद्यालये ................संस्कृत प्रतियोगिता भविष्यति।

(ग) सज्जनानां चित्तम्................कमलम् कोमलं भवति ।

**मञ्जूषा** (इतस्ततः, सर्वदा, श्वः)

10 अधोलिखितानां वाक्यानां वाच्यपरिवर्तनं कृत्वा उत्तरपुस्तिकायां लिखत– 1×3–3

(क) बालकः भोजनं करोति।

(ख) तया नाटकं दृश्यते।

(ग) अहं संस्कृतं पठामि।

11. घटिकां दृष्ट्वा संस्कृतपदेषु समयं लिखत। सोमेशः कदा किं करोति? 1×4=4

(क)



8:45 बजे

(ख)




5:00 बजे प्रातः

(ग)



4:30 अपराह्न

(घ)



10:15 बजे रात्रि



Downloaded from cclchapter.com

(क) सोमेशः प्रातः..............वादने स्वाध्यायं करोति।
(ख) सः...............वादने विद्यालयं गच्छति।
(ग) सः अपराह्ने ..............वादने गृहम् आगच्छति।
(घ) सोमेशः रात्रौ ................वादने शयनं करोति।

12. अधोलिखितयोः वाक्ययोः अङ्कानां स्थाने संख्यावाचक विशेषणैः रिक्तस्थानपूर्तिः संस्कृतेन कृत्वा पुनः उत्तरपुस्तिकायां लिखत– 1×2=2
(क) मम ग्रामे (27) ....... . क्रीडकाः सन्ति।
(ख) मम कक्षायां (49) .........छात्राः सन्ति।

13. अधोलिखितेषु वाक्येषु रेखांकितानि पदानि शुद्धानि कृत्वा पूर्णवाक्यं उत्तरपुस्तिकायां लिखत– 1×3–3
(क) छात्राः हसतः।
(ख) मोहनः मम मित्रः अस्ति।
(ग) नेत्रस्य बिना सुखं न भवति।

**खण्ड 'घ' (पठित अवबोधनम्)**

14. अधोलिखितं गद्यांशं पठित्वा तत् आधारितान् प्रश्नान् उत्तरत–

भो वासव! पुत्रस्य दैन्यं दृष्ट्वा अहं रोदिमि। सः दीन इति जानन्नपि कृषकः बृषभं बहुधा पीडयति। सः कृच्छेण भारमुद्वहति। इतरमिव धुरं वोढुं सः न शक्नोति। एतत् भवान् पश्यति न?" इति। "भद्रे! नूनम्। सहस्राधिकेषु पुत्रेषु सत्स्वपि तव अस्मिन्नेव एतादृशं वात्सल्यं कथम्?

(क) एकपदेन उत्तरत– 1
(i) कः कृच्छ्रेण भारम् उद्वहति?

(ख) पूर्णवाक्येन उत्तरत– 1×2=2
(i) इन्द्रः सुरभिं किम् अपृच्छत्?
(ii) बृषभं कः बहुधा पीडयति?

(ग) निर्देशानुसारम् उत्तरत– 1×2=2
(i) 'भवान्' इति सर्वनामपदं कस्मै प्रयुक्तम्?
(ii) 'सरलतया' इति पदस्य विपरीतार्थकं पदम् किम्?

15. अधोलिखितं श्लोक पठित्वा प्रश्नान् उत्तरत–

निमित्तमुद्दिश्य हि यः प्रकुप्यति,
ध्रुवं स तस्यापगमे प्रसीदति।
अकारणद्वेषि मनस्तु यस्य वै,
कथं जनस्तं परितोषयिष्यति॥

(क) एकपदेन उत्तरत– 1
(i) कस्य अपगमे नरः प्रसीदति?



Downloaded from cclchapter.com

(ख) पूर्णवाक्येन उत्तरत 1×2=2

(i) कीदृशम् नरं जनः न परितोषयिष्यति?

(ii) प्रकोपस्य अपगमे सति कःप्रसीदति?

(ग निर्देशानुसारम् उत्तरत– 1×2=2

(i) 'प्रसीदति' इति क्रियापदस्य कर्तृपदं किम्?

(ii) 'निश्चितम्' इत्यर्थे किम् पदं प्रयुक्तम्?

16. अधोलिखितं नाट्यांशं पठित्वा तदाधारित प्रश्नान् उत्तरत–

रामः– (स्वगतम्) धिङ् मामेवंभूतम् सा तपस्विनी मत्कृतेनापराधेन स्वापत्यमेवं मन्युगर्भैरक्षरैर्निर्भर्त्सयति।(सवाष्पमवलोकयति)।

रामः– अतिदीर्घः प्रवासोऽयं दारुणश्च। (विदूषकमवलोक्य जनान्तिकम्) कुतूहलेनाविष्टो मातरमनयोर्नामतो वेदितुमिच्छामि। न युक्तं च स्त्रीगतमनुयोक्तुम्, विशेषतस्तपोवने। तत् कोऽत्राभ्युपायः?

विदूषकः – (जनान्तिकम्) अहं पुनः पृच्छामि। (प्रकाशम्) किं नामधेया युवयोर्जननी?

लवः – तस्याः द्वे नामनी।

विदूषकः – कथमिव?

लवः– तपोवनवासिनो देवीति नाम्नाह्वयन्ति, भगवान् वाल्मीकिर्वधूरिति।

रामः:– अपि च इतस्तावद् वयस्य! मुहूर्तमात्रम्।

विदूषकः – (उपसृत्य) आज्ञापयतु भवान्।

रामः– अपि कुमारयोरनयोरस्माकं सर्वथा समरूपः कुटुम्बवृत्तान्त?

(क) एकपदेन उत्तरत– 1

(i) कस्याः द्वे नामनी?

(ख) पूर्णवाक्येन उत्तरत– 1×2=2

(i) के देवीति नाम्नाह्वयन्ति?

(ii) केषां सर्वथा समरूपः कुटुम्बवृत्तान्तः?

(ग) निर्देशानुसारम् उत्तरत– 1×2=2

(i) 'कुतूहलेनाविष्टो' पदे सन्धिविच्छेदं कुरुत ।

(ii) अतिदीर्घः प्रवासोऽयम्' अत्र विशेषणपदं लिखत

17. अधलिखितयोः श्लोकयोः भावार्थम् उपयुक्तपदैः पूरयित्वा उत्तरपुस्तिकायां लिखत ।

क) क्रोधो हि शत्रुः प्रथमो नराणां, देहस्थितो देहविनाशनाय।
यथास्थितः काष्ठगतो हि वह्निः, एव वह्निर्दहते शरीरम्।। 1/2×4=2

भावार्थः–हि (i).............. देहविनाशनाय प्रथमः शत्रुः (ii)...............यथा हि काष्ठगतः स्थितः वह्निः (iii)............ तथैव शरीरस्थः क्रोधः (iv)................. ।



Downloaded from cclchapter.com

(ख) एक एव खगो मानी वने वसति चातकः।
पिपासितो वा म्रियते याचते वा पुरन्दरम्॥ 1/2×4=2
भावार्थः– एक एव ..............खगः चातकः ........... वसति , वा ........... म्रियते पुरंदरम याचते ........।

18. अधोलिखित श्लोकयोः अन्वयं पूरयित्वा उत्तरपुस्तिकायां लिखत– 1/2×2=1

(क) सेवितव्यो महावृक्षः फलच्छायासमन्वितः।
यदि दैवात् फलं नास्ति छाया केन निवार्यते।।

**अन्वय** – फलच्छाया समन्वितः............ सेवितव्यो दैवात् यदि फलं ........... केन निवार्यते।

(ख) दुष्कराण्यपि कर्माणि मतिवैभवशालिनः। 1/2×2=1
नीतिं युक्तिं समालम्ब्य लीलयैव प्रकुर्वते।।

**अन्वय** – मतिवैभवशालिनः दुष्कराण्यपि ................ नीतिं युक्तिं समालम्ब्य लीलयैव...............।

19. रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कृत्वा उत्तरपुस्तिकायां लिखत– 1/2×4=2

(क) उद्याने पक्षिणां कलरवं चेतः प्रसादयति।
(ख) धेनूनां माता सुरभिः आसीत्।
(ग) वानरः आत्मानं वनराजपदाय योग्यय मन्यते।
(घ) गजः वन्यपशून् तुदन्तं शुण्डेन पोथयित्वा मारयति।

20. अधोलिखितानि वाक्यानि घटनाक्रमेण संयोज्य पुनः उत्तरपुस्तिकायां लिखत– 1/2×6=3

(i) क्रुद्धः सिंह से प्रहतुमिच्छति परं वानरस्तु कुर्दित्वा वृक्षमारूढः।
(ii) निद्राभङ्गदुःखेन वनराज सन्नपि तुच्छजीवैः आत्मनः एतादृश्या दुरवस्थया श्रान्तः सर्वजन्तून् दृष्ट्वा पृच्छति।
(iii) एकः सिंहः सुखेन विश्राम्यते तदैव एकः वानरः आगत्य तस्य पुच्छं धुनोति।
(iv) वानराः हसन्ति वृक्षोपरि च विविधाः पक्षिणः अपि सिंहस्य एतादृशीं दशां दृष्ट्वा हर्षमिश्रितं कलरवं कुर्वन्ति।
(v) क्रुद्धः सिंह इतस्ततः धावति, गर्जति परं किमपि कर्तुमसमर्थः एव तिष्ठति।
(vi) एक वानरः यतः त्वं वनराजः भवितुं तु सर्वथाऽयोग्यः। राजा तु रक्षकः भवति। परं भवान् तु भक्षकः।

21. निम्नांकित शब्दानां संस्कृतेन वाक्यप्रयोगं कुरुत– 1×2=2

(क) इतस्ततः (ख) मिलित्वा

*****



Downloaded from cclchapter.com